# शान्तिगीता (Śāntigītā) : **Chapter 3**

| | |
|---|---|
| **अथ तृतीयोऽध्यायः ।** | **atha tṛtīyo 'dhyāyaḥ** |
| अर्जुन उवाच । | arjuna uvāca |
| योगी मुक्तः कथं कृष्ण व्यवहारे चरेद्वद ।<br>विना कस्याप्यहङ्कारं व्यवहारो न सम्भवेत् ॥ १॥ | yogī-muktaḥ kathaṃ kṛṣṇa vyavahāre caret vada,<br>vinā kasya api ahaṅkāram vyavahāraḥ na sambhavet. 1 |
| श्रीभगवानुवाच । | śrībhagavān uvāca |
| शृणु तत्त्वं महाबाहो गुह्यात् गुह्यतरं परम् ।<br>यच्छ्रुत्वा संशयच्छेदात् कृतकृत्यो भविष्यसि ॥ २॥ | śṛṇu tattvaṃ mahābāho guhyāt guhyataraṃ param,<br>yat-śrutvā saṃśaya-chedāt kṛta-kṛtyo bhaviṣyasi. 2 |
| व्यावहारिकदेहेऽस्मिन्नात्मबुद्ध्या विमोहितः ।<br>करोति विविधं कर्म जीवोऽहङ्कारयोगतः ॥ ३॥ | vyāvahārika-dehe 'smin ātmabuddhyā vimohitaḥ,<br>karoti vividhaṃ karma jīvo 'haṅkāra-yogataḥ. 3 |
| न जानाति स्वमात्मानमहं कर्तेति मोहितः ।<br>अहङ्कारस्य सद्धर्मः संघातं स विचालयेत् ॥ ४॥ | na jānāti svam ātmānamahaṃ kartā iti mohitaḥ,<br>ahaṅkārasya sat-dharmaḥ saṃghātaṃ sa vicālayet. 4 |
| आत्मा शुद्धः सदा मुक्तः सङ्गहीनश्चिदक्रियः ।<br>न हि सम्बन्धगन्धं तत् संघातैर्मायिकैः क्वचित् ॥ ५॥ | ātmā śuddhaḥ sadā muktaḥ saṅgahīnas cit akriyaḥ,<br>na hi sambandha-gandhaṃ tat saṃghātair māyikaiḥ kvacit. 5 |
| सच्चिदानन्दमात्मानं यदा जानाति निष्क्रियम् ।<br>तदा तेभ्यः समुत्तीर्णः स्वस्वरूपे व्यवस्थितः ॥ ६॥ | sat-cit-ānandam ātmānaṃ yadā jānāti niṣkriyam,<br>tadā tebhyaḥ samuttīrṇaḥ sva-svarūpe vyavasthitaḥ. 6 |
| प्रारब्धात् विचरेद्देहो व्यवहारं करोति च ।<br>स्वयं स सच्चिदानन्दो नित्यः सङ्गविवर्जितः<br>सुप्तस्य स्वप्नवत् कार्यं व्यवहारऽपि तत्तथा ॥ ७॥ | prārabdhāt vicaret dehaḥ vyavahāraṃ karoti ca,<br>svayaṃ sa sat-cid-ānando nityaḥ saṅga-vivarjitaḥ.<br>suptasya svapnavat kāryaṁ vyavahāre 'pi tat-tathā. 7 |
| अखण्डमद्वयं पूर्णं सदा सच्चित्सुखात्मकम् ।<br>देशकालजगज्जीवा न हि तत्र मनागपि ॥ ८॥ | akhaṇḍam-advayaṃ pūrṇaṃ sadā sat-cit-sukhātmakam,<br>deśa-kāla-jagat-jīvā na hi tatra manāk api. 8 |
| मायाकार्यमिदं सर्वं व्यवहारिकमेव तु ।<br>इन्द्रजालसमं मिथ्या मायामात्रविजृम्भितम् ॥ ९॥ | māyā-kāryam idaṃ sarvaṃ vyavahārikam eva tu,<br>indra-jālasamaṃ mithyā māyā-mātra-vijṛmbhitam. 9 |
| जाग्रदादि विमोक्षान्तं मायिकं जीवकल्पितम् ।<br>जीवस्यानुभवः सर्वः स्वप्नवद्भरतर्षभ ॥ १०॥ | jāgrat-ādi vimokṣāntaṃ māyikaṃ jīva-kalpitam,<br>jīvasya anubhavaḥ sarvaḥ svapnavat bharatarṣabha. 10 |
| न त्वं नाहं न वा पृथ्वी न दारा न सुतादिकम् ।<br>भ्रान्तोऽसि शोकसन्तापैः सत्यं मत्वा मृषात्मकम् ॥११॥ | na tvaṃ na ahaṃ na vā pṛthvī na dārā na sutādikam,<br>bhrānto 'si śoka-santāpaiḥ satyaṃ matvā mṛṣātmakam. 11 |
| शोकं जहि महाबाहो ज्ञात्वा मायाविलासकम् ।<br>त्वं सदाऽद्वयरूपोऽसि द्वैतलेशविवर्जितः ।<br>द्वैतं मायामयं सर्वं त्वयि न स्पृश्यते क्वचित् ॥ १२॥ | śokaṃ jahi mahā-bāho jñātvā māyā-vilāsakam,<br>tvaṃ sadā 'dvayarūpo 'si dvaita-leśa-vivarjitaḥ.<br>dvaitaṃ māyāmayaṃ sarvaṃ tvayi na spṛśyate kvacit. 12 |
| एकं न सङ्ख्याबद्धत्वात् न द्वयं तत्र शोभते ।<br>एकं स्वजातिहीनत्वाद्विजातिशून्यमद्वयम् ॥ १३॥ | ekaṃ na saṅkhyā-baddhatvāt na dvayaṃ tatra śobhate,<br>ekaṃ sva-jāti-hīnatvāt vijāti-śūnyam advayam. 13 |

केवलं सर्वशून्यत्वादक्षयाच्च सदव्ययम् ।
तुरीयं त्रितयापेक्षं प्रत्यक् प्रकाशकत्वतः ॥ १४ ॥

साक्षि-साक्ष्यमपेक्ष्यैव द्रष्टृदृश्यव्यपेक्षया ।
अलक्ष्यं लक्षणाभावात् ज्ञानं वृत्यधिरूढतः ॥ १५ ॥

अर्जुन उवाच ।

का माया याऽद्भुता कृष्ण काऽविद्या जीवसूतिका ।
नित्या वाप्यथवाऽनित्या कः स्वभावस्तयोर्हरे ॥ १६ ॥

श्रीभगवानुवाच ।

श्रृणु महाद्भुता माया सत्त्वादि त्रिगुणान्विता ।
उत्पत्तिरहिताऽनादिर्नैसर्गिक्यपि कथ्यते ॥ १७ ॥

अवस्तु वस्तुवद्भाति वस्तुसत्तासमाश्रिता ।
सदसद्भ्यामनिर्वाच्या सान्ता च भावरूपिणी ॥ १८ ॥

ब्रह्माश्रया चिद्विषया ब्रह्मशक्तिर्महाबला ।
दुर्घटोद्घटनाशीला ज्ञान-नाश्या विमोहिनी ॥ १९ ॥

शक्तिद्वयं हि मायाया विक्षेपावृतिरूपकम् ।
तमोऽधिकाऽवृतिः शक्तिविक्षेपाख्या तु राजसी ॥ २० ॥

विद्यारूपा शुद्धसत्त्वा मोहिनी मोहनाशिनी ।
तमःप्राधान्यतोऽविद्या सावृतिशक्तिमत्त्वतः ॥ २१ ॥

मायाऽविद्या न वै भिन्ना समष्टि-व्यष्टिरूपतः ।
मायाविद्या-समष्टिः सा चैकैव बहुधा मता ॥ २२ ॥

चिदाश्रया चितिभास्या विषयं तां करोति हि ।
आवृत्य चित्स्वभावं सद्विक्षेपं जनयेत्ततः ॥ २३ ॥

अर्जुन उवाच ।

यद्ब्रह्मशक्तिर्या माया सापि नाश्या भवेत् कथम् ।
यदि मिथ्या हि सा माया नाशस्तस्याः कथं वद ॥२४॥

श्रीभगवानुवाच ।

मायाख्यां भावसंयुक्तां कथयामि श्रृणुष्व मे ।
प्रकृतिं गुणसाम्यात्तां मायां चाद्भुतकारिणीम् ॥ २५ ॥

प्रधानमात्मसात्कृत्वा सर्वं तिष्ठेदुदासिनी ।
विद्या-नाश्या तथाऽविद्या शक्तिर्ब्रह्माश्रयत्वतः ॥ २६ ॥

विना चैतन्यमन्यत्र नोदेति न च तिष्ठति ।
अतएव ब्रह्मशक्तिरित्याहुर्ब्रह्मवादिनः ॥ २७ ॥

kevalaṃ sarva-śūnyatvāt akṣayāt ca sat avyayam,
turīyaṃ tritayāpekṣaṃ pratyak prakāśakatvataḥ. 14
sākṣi-sākṣyam apekṣya eva draṣṭṛ-dṛśya-vyapekṣayā,
alakṣyaṃ lakṣaṇābhāvāt jñānaṃ vṛttyadhirūḍhataḥ. 15
arjuna uvāca
kā māyā yā 'dbhutā kṛṣṇa kā 'vidyā jīva-sūtikā,
nityā vā api athavā 'nityā kaḥ svabhāvas tayor hare. 16
śrībhagavānuvāca
śṛṇu mahādbhutā māyā sattvādi triguṇānvitā,
utpatti-rahitā 'nādirnaisargikī api kathyate. 17
avastu vastuvat bhāti vastu-sattāsamāśritā,
sadasadbhyām anirvācyā sāntā ca bhāva-rūpiṇī. 18
brahmāśrayā cit-viṣayā brahma-śaktir mahā-balā,
durghaṭodghaṭanā-śīlā jñāna-nāśyā vimohinī. 19
śakti-dvayaṃ hi māyāyā vikṣepāvṛti-rūpakam,
tamo 'dhika āvṛtiḥ śakti-vikṣepākhyā tu rājasī. 20
vidyā-rūpā śuddha-satvā mohinī moha-nāśinī,
tamaḥ-prādhānyato 'vidyā sā āvṛti-śaktimattvataḥ. 21
māyā 'vidyā na vai bhinnā samaṣṭi-vyaṣṭi-rūpataḥ,
māyāvidyā-samaṣṭiḥ sā ca ekā eva bahudhā matā. 22
cidāśrayā citibhāsyā viṣayaṃ tāṃ karoti hi,
āvṛtya citsvabhāvaṃ sadvikṣepaṃ janayettataḥ. 23
arjuna uvāca
yat-brahma-śaktir yā māyā sā api nāśyā bhavet katham,
yadi mithyā hi sā māyā nāśas tasyāḥ kathaṃ vada. 24
śrībhagavān uvāca
māyākhyāṃ bhāva-saṃyuktāṃ kathayāmi śṛṇuṣva me,
prakṛtiṃ guṇa-sāmyāt tāṃ māyāṃ ca
adbhuta-kāriṇīm. 25
pradhānam ātmasāt kṛtvā sarvaṃ tiṣṭhet udāsinī,
vidyā nāśyā tathā 'vidyā śaktir brahmāśrayatvataḥ 26
vinā caitanyam-anyatra na-udeti na ca tiṣṭhati,
ataeva brahma-śaktir-iti-āhur-brahma-vādinaḥ. 27
śakti-tattvaṃ pravakṣyāmi śṛṇuṣva tat-samāhitaḥ,

| | |
|---|---|
| शक्तितत्त्वं प्रवक्ष्यामि श्रृणुष्व तत्समाहितः ।<br>ब्रह्मणश्चिज्जडैर्भेदात् द्वे शक्ती परिकीर्तिते ॥ २८॥ | brahmaṇas cit-jaḍair bhedāt dve śaktī parikīrtite. 28 |
| चिच्छक्तिः स्वरूपं ज्ञेया माया जडा विकारिणी ।<br>कार्य-प्रसाधिनी माया निर्विकारा चितिः परा ॥ २९॥ | cit-śaktiḥ svarūpaṃ jñeyā māyā jaḍā vikāriṇī,<br>kārya-prasādhinī māyā nirvikārā citiḥ parā. 29 |
| अग्नेर्यथा द्वयी शक्तिर्दाहिका च प्रकाशिका ।<br>न हि भिन्नाथवाऽभिन्ना दाहशक्तिश्च पावकात् ॥३०॥ | agner yathā dvayī śaktirdāhikā ca prakāśikā,<br>na hi bhinnāthavā 'bhinnā dāha-śaktis ca pāvakāt. 30 |
| न ज्ञायते कथं कुत्र विद्यते दाहतः पुरा ।<br>कार्यानुमेया सा ज्ञेया दाहेनानुमितिर्यतः ॥ ३१॥ | na jñāyate kathaṃ kutra vidyate dāhataḥ purā,<br>kāryānumeyā sā jñeyā dāhenānumitiryataḥ. 31 |
| मणिमन्त्रादि-योगेन रुध्यते न प्रकाशते ।<br>सा शक्तिरनलाद्भिन्ना रोधनान्न हि तिष्ठति ॥ ३२॥ | maṇi-mantrādi-yogena rudhyate na prakāśate,<br>sā śaktir analāt bhinnā rodhanānna hi tiṣṭhati. 32 |
| नोदेति पावकाद्भिन्ना ततोऽभिन्नेति मन्यते ।<br>नानले वर्तते सा च न कार्ये स्फोटके तथा ॥ ३३॥ | na udeti pāvakāt bhinnā tato 'abhinnā iti manyate,<br>na anale vartate sā ca na kārye sphoṭake tathā. 33 |
| अनिर्वाच्याद्भुता चैव मायाशक्तिस्तथेष्यताम् ।<br>या शक्तिर्नानलाद्भिन्ना तां विनाग्निर्न किञ्चन ॥ ३४॥ | anirvācya-adbhutā caiva māyāśaktis-tatha-eṣyatām,<br>yā śaktir na analāt bhinnā tāṃ vinā agnir na kiñcana. 34 |
| अनलस्वरूपा ज्ञेया शक्तिः प्रकाशरूपिणी ।<br>चिच्छक्तिर्ब्रह्मणस्तद्वत् स्वरूपं ब्रह्मणः स्मृतम् ॥३५॥ | anala-svarūpā jñeyā śaktiḥ prakāśa-rūpiṇī,<br>cit-śaktir brahmaṇas tat vat svarūpaṃ brahmaṇaḥ smṛtam. 35 |
| दाहिकासदृशी माया जडा नाश्या विकारिणी ।<br>मृषात्मिका तु याऽवस्तु तन्नाशस्तत्त्व-दृष्टितः ॥ ३६॥ | dāhikā-sadṛśī māyā jaḍā nāśyā vikāriṇī,<br>mṛṣātmikā tu yā 'vastu tat-nāśas tattva-dṛṣṭitaḥ. 36 |
| मिथ्येति निश्चयात् पार्थ मिथ्यावस्तु विनश्यति ।<br>आश्चर्यरूपिणी माया स्वनाशेन हि हर्षदा ॥ ३७॥ | mithyā iti niścayāt pārtha mithyā-vastu vinaśyati,<br>āścarya-rūpiṇī māyā sva-nāśena hi harṣadā. 37 |
| अज्ञानां मोहिनी माया प्रेक्षणेन विनश्यति ।<br>माया स्वभाव-विज्ञानं सान्निध्यं न हि वाञ्छति ॥ ३८॥ | ajñānāṃ mohinī māyā prekṣaṇena vinaśyati,<br>māyā svabhāva-vijñānaṃ sānnidhyaṃ na hi vāñchati. 38 |
| महामाया घोरा जनयति महामोहमतुलं<br>ततो लोकाः स्वार्थे विवशपतिताः शोक-विकलाः ।<br>सहन्ते दुःसह्यं जनिमृतिजराक्लेशबहुलं<br>सुभुञ्जाना दुःखं न हि गतिपरां जन्मबहुभिः ॥ ३९॥ | mahā-māyā ghorā janayati mahā-moham atulaṃ<br>tataḥ lokāḥ svārthe vivaśa-patitāḥ śoka-vikalāḥ,<br>sahante duḥsahyaṃ jani-mṛti-jarā-kleśa-bahulaṃ<br>subhuñjānā duḥkhaṃ na hi gati-parāṃ janma-bahubhiḥ. 39 |
| इत्यध्यात्मविद्यायां योगशास्त्रे श्रीवासुदेवार्जुनसंवादे<br>शान्तिगीतायां तृतीयोऽध्यायः ॥ | ityadhyātmavidyāyāṃ yogaśāstre śrīvāsudevārjunasaṃvāde<br>śāntigītāyāṃ tṛtīyo 'dhyāyaḥ. |